यमनैरृतनोदेशवायुयक्षेशशङ्कराः ।
इन्द्रो वह्निरिति प्रोक्ता विभागानामधीश्वराः ॥
इन्द्रे कारालयं कुर्य्यात् भयस्थाने च पत्तयः ।
शिवे सहचरान् रक्षेत् पश्चे वाजिगजादयः ॥
धने धान्यादिकं रक्षेत् निरृते कोषरक्षणम् ।
राजपट्टे मध्यदेशे नार्पं कश्चिन्नरालयम् ।
प्राचीरप्रविभागान्ते इति भोजस्य सम्मतम् ॥”
इति युक्तिकल्पतरौ राजगृहयुक्तिः ॥ * ॥
“वास्तुमानेन नियमो गृहमानेन निर्णयः ॥”
तत्र वास्तुप्लवलक्षणम् ।
“पूर्व्वप्लवो वृद्धिकरो धनदश्चोत्तरप्लवः ।
दक्षिणस्थो मृत्युदो वास्तुर्व्वनदा पश्चिमप्लवः ॥
कोणे रेखाद्वयं कृत्वा मध्ये रेखाद्वयं तथा ।
ऐशानकोणतो रेखा दक्षिणादेर्ध्वजास्तथा ॥
नाचामरो नामशिरा नापताकापि नाध्वजः ।
नाकुम्भादिर्नातिमानो ना चित्रो नातिचित्रभृक् ॥
नात्युच्चो नातिनीचो वा नाप्रकीर्णप्रकीर्णकः ।
ना धातुनागराचश्च न चैकानेकद्वारभाक् ॥
नियमोऽस्तु महीन्द्राणां सर्व्वसम्पत्तिहेतवे ॥”
इति राजगृहयुक्तिः ॥ * ॥
अन्येषान्तु यथा वास्तुमानेन नियमः ।
“ध्वजो धूमस्तथा सिंहः श्वा वृषो गर्द्दभो गजः ।
काक इत्येव गदितो वास्तुस्थानस्य निर्णयः ।
अयुग्मे सुखसम्पत्तिर्युग्मश्च विपदास्पदम् ॥”
एवमन्यत्रापि ।
“ध्वजे विभूतिर्व्विपदश्च धूमे
सिंहे विभोगः शुनि सर्व्वनाशः ।
वृषे सुखं गर्द्दभतो विनाशो
गजे धनं काकपदे च मृत्युः ॥
कोणरेखा कोणसूचिः सुखसम्पत्तिनाशिनी ।
पूर्व्वपश्चिमतो दण्ड उदयाख्यः सुखावहः ॥
दक्षिणोत्तरतो दण्डो वंशहा यमदण्डकः ।
एतानि पातयेद्धीमानेषां दण्डयथान्तरे ॥ * ॥
एका चेद्दक्षिणे शाला द्वे च दक्षिणपश्चिमे ।
तिस्रश्चेत् पूर्व्वतो हीनाश्चतुःशालं सुखावहम् ॥
पश्चिमास्यं ध्वजे वेश्म सिंहे तूदङ्मुखं शुभम् ।
पूर्व्वास्यं वृषस्थाने दक्षिणाभिमुखं गजे ॥
पदाघातः परिखाघातः पथाघातस्तथैव च ।
जलदोषो वृक्षदोषो दोषा इत्येवमादयः ॥
गच्छतां पदतालस्य श्रवणं यदि वेश्मनि ।
पदाघातो नाम दोषः पुत्रपौत्रधनापहः ॥
परिखादश्चयोर्घातो वास्तुनोः प्रतिवेशिनोः ।
परिखाघातो नाम दोषः कुलवीर्य्यधनापहः ॥
पथाघातो नाम दोष आघातो वास्तुनः पथः ।
स हन्ति भोगं वंशञ्च तस्य भेदमतः शृणु ॥
एकमार्गं सुखं कुर्य्यात् द्विपथं कुलवर्द्धनम् ।
त्रिपथं कुलनाशाय सर्व्वनाशश्चतुष्पथे ॥
स्ववाप्यां परवाप्याञ्च यस्तिष्ठति जलाशयः ।
तद्दोषो जलदोषः स्यात् स हन्ति कुलसम्पदः ॥
ऋद्धिमानसुखैश्वर्य्यमृत्युक्लेशभयामयाः ।
एते जलाशये दोषाः पूर्व्वादिदिक्षु च क्रमात् ॥
खवास्तुरचतो दोषः कुलसम्पत्तिनाशनः ।
वर्ज्जयेत् पूर्व्वतोऽश्वत्थं प्लक्षं दक्षिणतस्तथा ॥
ऐशान्यां रक्तपुष्पञ्च आग्नेय्यां क्षीरिणस्तथा ।
यत्र तत्र स्थिता वृक्षा बिल्वदाड़िमकेशराः ।
पनसा नारिकेलाश्च शुभं कुर्व्वन्ति निश्चयम् ।
निशा नीली पलाशश्च चिञ्चा श्वेतापराजिता ।
कोविदारश्च सर्व्वत्र सर्व्वं निघ्नन्ति मङ्गलम् ॥ * ॥
गृहपातनमिच्छन्ति नागस्य स्वपने क्रमात् ।
पूर्व्वादिषु शिरः कृत्वा नागः शेते त्रिभि-
स्त्रिभिः ।
भाद्राद्यैर्व्वामपार्श्वेन तस्य क्रोड़े गृहं शुभम् ॥”
तत्र प्रमाणम् ।
“स्वामिहस्तप्रमाणेन ज्येष्ठपत्नीकरेण वा ।
गृहाभ्यन्तरसंस्थानं मापयेदभितो नरः ॥” * ॥
तत्र सामान्यलक्षणम् ।
“गृहभूमिसमाहतपिण्डपदं
वसुलोचनरन्ध्रगणैर्गुणितम् ।
रविभूधरचिंह्नदयोगहृतं
भवनाय ययश्चितिकम्पपदम् ॥
एकाशीतिगुणे हस्ते दिवाणैकहृते च ते ।
षड़िन्दुयुग्मसम्भक्ते पिण्डः स्यात् सर्व्ववेश्मनः ॥”
तद्यथा ।
“ध्वजादिगेहसंस्थाने गृहमानं शुभावहम् ।
दीर्घे भानुः परीणाहे सप्त चैवाङ्गुलिद्वयम् ॥
इदं पुत्रफलं गेहं वृषस्थानेऽप्युदीरितम् ।
दीर्घे षट्प्रसरे पञ्च चतस्रोऽङ्गुलयोऽपि च ॥
इदं पुत्रफलं गेहं गजस्थाने प्रकीर्त्तितम् ।
दीर्घे त्रयोदश भुजाङ्गुलयश्चैकविंशतिः ॥
प्रसरेऽष्टौ सुखफलं गजस्थाने गृहं विदुः ।
इति द्वादशकं प्रोक्तं गृहाणां सर्व्वसम्मतम् ।
एवं गृहं समाचर्य्य गृहस्थः शुभमिच्छति ॥” * ॥
भोजस्तु ।
“आयामपरिणाहाभ्यां योऽङ्कपिण्डो विजायते ।
येन केनापि चाङ्केन शोधनीयः स दृश्यते ॥
एकद्विपञ्चसप्तानि शुभान्यन्यानि चान्यथा ।
आयामपरिणाहाभ्यां सार्द्धद्वादशहस्तकम् ।
एतत्तु मङ्गलं नाम गृहं सुखविवर्द्धनम् ।
आयामपरिणाहाभ्यां सार्द्धहस्तचतुर्द्दश ॥
इदं कमलकं नाम गृहं सम्पत्तिकारकम् ।
आयामपरिणाहाभ्यां सार्द्धहस्तास्तु षोड़श ।
इदं हि सर्व्वतोभद्रं स्वामिनः सुखकारकम् ॥
आयामपरिणाहाभ्यां सार्द्धाष्टादशहस्तकम् ।
कल्याणनाम वेश्मेदं धनधान्यसुखप्रदम् ॥
आयामपरिणाहाभ्यां सार्द्धविंशतिहस्तकम् ।
इदं हि सुखदं नाम भर्त्तुः सुखविवर्द्धनम् ॥
मया यदिदमुद्दिष्टं गृहपञ्चकमद्भुतम् ।
न तेषु स्थाननियमः सर्व्वेष्वेतानि कारयेत् ॥
स्थानं मानञ्च दोषाश्च ये प्रोक्तास्तु मया क्रमात् ।
तद्विचार्य्य गृहं कृत्वा गृहस्थः सुखमश्नुते ॥
अज्ञानादथ मोहाद्वा योऽन्यथा गृहमाचरेत् ।
स विषीदति नश्येत तस्य कीर्त्तिः कुलं बलम् ॥
प्राचीराणां न नियमो गृहस्थानाच्च विद्यते ।
यथावास्तु यथाशक्ति प्राचीरानचयेद्गृही ॥
गृहदोषो यथा न स्यात् तथा प्राचीरकल्पना ॥”
इति युक्तिकल्पतरौ गृहयुक्तिः ॥ * ॥
अथ वास्तुयागप्रमाणम् । लैङ्गे ।
चतुःषष्टिपदं वास्तु सर्व्वदेवगृहं प्रति ।
एकाशीतिपदं वास्तु मानुषं प्रति सिद्धिदम् ॥
अग्रतः शोधयेद्वास्तुभूमिं यस्य पुरोदिताम् ।
चतुर्हस्तं द्विहस्तं वा जलान्तं वापि शोध्य च ॥
सुसमञ्च तदा कृत्वा सदार्च्चनं ततो भवेत् ॥”
पुरोदितां ब्राह्मणादिभेदेन प्रशस्तत्वेनोपपादि-
ताम् ॥ * ॥ तथा च मत्स्यपुराणम् ।
“अरत्निमात्रे गर्त्ते वै अनुलिप्ते च सर्व्वशः ।
घृतमामशरावस्थं कृत्वा वर्त्तिचतुष्टयम् ॥
ज्वालयेत्तु परीक्षार्थं पूर्णं तत् सर्व्वदिङ्मुखम् ।
दीप्तौ पूर्व्वादि गृह्णीयात् वास्तूनामनुपूर्व्वशः ॥
वास्तुः समृद्धिको नाम दीप्यते सर्व्वतो हि यः ।
शुभदः सर्व्ववर्णानां प्रासादेषु गृहेषु च ॥”
वास्तुकर्त्तुररत्निमात्रे गर्त्ते तत्रैव स्थापिते आम-
शरावे पूर्व्वादिक्रमेण वर्त्तिचतुष्टयं कृत्वा गव्य-
घृतेनापूर्य्य वर्त्तिचतुष्टयं प्रज्वालयेत् । तत्र
प्राच्यां दीपशिखाया उज्ज्वलत्वे तद्वास्तु ब्राह्म-
णस्य प्रशस्तम् । एवं दक्षिणादिदिक्षु शिखाया-
स्तथात्वे क्षत्रियादेः । सर्व्वशिखासमत्वे सर्व्व-
वर्णानां स वास्तुदेशः प्रशस्तः । जलान्तमिति
तु मत्स्यपुराणपरिभाषितं प्रासादपरम् ॥ * ॥
तथा च मात्स्ये ।
“पुरुषाधःस्थितं शल्यं न गृहे दोषदं भवेत् ।
प्रासादे दोषदं शल्यं भवेद्यावज्जलान्तिकम् ॥
प्रासादभवनादीनां निवेशं विस्तराद्वद ।
कुर्य्यात् केन विधानेन कश्च वास्तुरुदाहृतः ॥”
इत्युपक्रम्य वाप्यादीनामभिधानादादिपदात्
कूपादयो गृह्यन्ते । प्रासादेऽप्येवमेव स्यात् कूप-
वापीषु चैव हि । इत्यभिधानाच्च कूपादावपि ॥
वास्तुपुरुषश्च ।
“कश्यपस्य गृहिणी तु सिंहिका
राहुवास्तुतनयावजीजनत् ।
पूर्व्वजो हरिनिकृत्तकन्धरो
दैवतैरवरजो निपातितः ॥”
तथा ।
“चैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः ।
वैशाखे धनरत्नानि ज्यैष्ठे मृत्युमवाप्नुयात् ॥
आषाढ़े भृत्यरत्नानि पशुवर्गमवाप्नुयात् ।
श्रावणे मित्रलाभस्तु हानिर्भाद्रपदे तथा ॥
आश्विने पत्नीनाशः स्यात् कार्त्तिके धनधान्य-
कम् ।
मार्गशीर्षे तथा भक्तं पौषे तस्करतो भयम् ॥
माघे चाग्निभयं विद्यात् काञ्चनं फाल्गुने
सुतान् ।
शुक्लपक्षे भवेत् सौख्यं कृष्णे तस्करतो भयम् ॥
अश्विनी रोहिणी मूलमुत्तरात्रयमैन्दवम् ।
स्वाती हस्तानुराधा च गृहारम्भे प्रशस्यते ॥
आदित्यभौमवर्ज्जन्तु सर्व्वे वाराः शुभावहाः ।
वज्रव्याघातशूले च व्यतीपातातिगण्डयोः ॥